था रूपं रसो गंधं इति क्रमात् ॥ १६ ॥ वाक्कराङ्घ्रिगु
दोपस्थान्याहुः कर्मेंद्रियाणि तु ॥ वचनादानगमन
विसर्गरतयः क्रमात् ॥ १७ ॥ क्रियास्तेषां मनो बुद्धिर
हंकारस्ततः परं ॥ अंतःकरणमित्याहुः चित्तं चेति
चतुष्टयं ॥ १८ ॥ सुखं दुःखं च विषयौ विज्ञेयौ मनसः
क्रिये ॥ स्मृतिभीतिविकल्पाद्या बुद्धिः स्यान्निश्च

यात्मिका ॥१९॥ अहं ममेत्यहंकारश्चित्तं चेतयतेय

58 तः ॥ सत्वाख्यमंतःकरणं गुणभेदात्त्रिधा मतं ॥२०॥

सत्वं रजस्तम इति त्रिगुणाः सत्वतु सात्विकाः ॥ आस्ति

क्यशुद्ध्यधर्मैकरुचिप्रवृत्तयो मताः ॥२१॥ रजसो रा

जसा भावाः कामक्रोधमदादयः ॥ प्रमादालस्य

निद्रादिवचनाद्यास्तु तामसाः ॥२२॥ प्रसन्नेंद्रिय

तारोग्यानालस्याद्यास्तु सत्वजाः ॥ देहो मात्रात्म

कालस्यादादत्ते तद्गुणानिमान्॥२३॥श्राद्धः श्रोत्रं
मुखस्तानेचिन्त्यं समसमतात्वधनिः॥ वल्केचगगानाद्दा
योः स्पर्शञ्चस्पर्शनेंद्रियं॥२४॥ उत्क्षेपनमवक्षेपाकुं
चनेगमनंतथा॥ प्रसारणमितीमानि पंचकर्मा पि
रूपतां॥२५॥ प्राणापानौ तथा व्यानसमानोद्वान
संज्ञकान्॥ नागं कूर्मंचकृकरं देवदत्तं धनंजयम्॥
॥२६॥ दशेतिवायुविकृतीस्तथागृह्णातिलाघवं॥

शि॰
१

तेषां मुख्यतरः प्राणो नाभेः कंठादवस्थितः ॥२७॥
चरत्यसौ नासिकयोर्नाभौ हृदयपंकजे ॥ शद्बोच्चा
रण निश्वासोच्छ्वासादेरपि कारणं ॥२८॥ अपानस्तु
गुदे मेढ्रे कटिजंघोदरेष्वपि ॥ नाभौ कंठे च वपा ५७
योंऽरू जानुनि तिष्ठति ॥२९॥ प्राणायामध्वनि
त्यागग्रहणाद्यस्य कर्म च ॥ समानो व्याप्य निखि
लं शरीरं वह्निना सह ॥३०॥ द्विसप्ततिसहस्त्रेषु

नाडीरंध्रेषु संचरन् ॥ भुक्तपीतरसान्सम्यग्गान
यन्देहपुष्टिकृत् ॥ ३१ ॥ उदानः पादयोरास्ते हस्तयो
रंगसंधिषु ॥ कर्मास्य देहोन्नयनोत्क्रमणादि प्रकी
र्तितं ॥ ३२ ॥ त्वगादिधातूनाश्रित्य पंच नागादयः
स्थिताः ॥ ३३ ॥ उद्गारादीनि मेषादि क्षुत्पिपासादिकं
क्रमात् ॥ ३४ ॥ तंद्राप्रकृति शोकादि तेषां कर्म प्र
कीर्तितं ॥ अग्नेस्तु रोचकं रूपं दीप्तिः पाकं प्रका

60

शिता ॥ ३४ ॥ अमर्षस्तीक्ष्णसूक्ष्माणामोजस्तेज
श्च शूरता ॥ मेधा विचिंतना तथा धत्तेजन्मफुरसनं र
सम् ॥ ३५ ॥ श्लेत्वं स्नेहं द्रवं स्वेदं गात्रादिमृदुताम
पि ॥ भूमेर्घ्राणेन्द्रियं गंधं स्थैर्यं धैर्यं च गौरवं ॥ ३६
त्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणि धातवः ॥
अन्नं पुंसाशितं त्रेधा जायते जठराग्निना ॥ ३७ ॥
मलं स्थविष्ठो भागः स्यान्मध्यमो मांसतां व्रजे

त्वा मनः कनिष्ठभागः स्यात्तस्मादन्नमयं मनः
॥३९॥ अपांस्थविष्ठो मूत्रं स्यान्मध्यमो रुधिरं भ
वेत्॥ कनिष्ठभागः प्राणः स्यात्तस्मात्प्राणो जला
त्मकः॥३१॥ तेजसोस्थि स्थविष्ठः स्यान्मज्जा म
ध्यसमुद्भवा॥ नाड्यो पि मांससंघातात्शुक्रं मज्जा
समुद्भवं॥४०॥ वातपित्तकफास्तत्र धातवः परि
कीर्त्तिताः॥ दशांजलि जलं ज्ञेयं रसस्यांजलयो

शि०
९

नच॥४१॥रक्तस्याष्टौ पुरीषस्य सप्त स्युः श्लेष्मणा

चषट्॥पित्तस्य पंचचत्वारो मूत्रस्यांजलयस्त्रयः॥

॥४२॥वसाश्च मेदसो द्वौ तु मज्जा त्वंजलिसंमिता॥

अर्धांजलिस्ततः शुक्रं तदेव बलमुच्यते॥४३॥अस्थ्रा ५९

स्थ्नां शरीरे संख्या स्यात् षष्ठियुक्तं शतत्रयं॥जलजा

नि कपालानि रुचकास्तरणानि च॥४४॥नल्वका

नीति तान्याहुः पंचधास्थीनि सूरयः॥विंशते

त्वगस्थिसंधीनांस्यात्तान्नद्योत्चरे॥४५॥गौर
याःपसराःतुंदसेवनाःस्पुरन्त्युरखल्वः॥समुद्रामे
दल्काःशंखावर्त्तावापनकुंदल्काः॥४६॥इत्यष्टधा
समुद्दिष्टाःशरीरेत्वगस्थिसंधयः॥सार्धकोटित्रयं
रोम्णांश्मश्रुकेशांघ्रिलक्षकाः॥४७॥देहस्वरूपमे
वंतेप्रोक्तंदशरथात्मज॥यस्मादसारोनास्त्येव
पदार्थोभुवनत्रये॥४८॥देहेस्मिन्नभिमानेनम

हापापाद्यवृहद्यः॥ अहंकारेणपापेनक्रियतेहंत
62 संसृतिः॥४९॥तस्मादेतत्स्वरूपंतुबोद्धव्यंचमुमुक्षु
भिः॥५०॥इतिश्रीपद्मपुराणेशिवगीतासूपनिष
त्सुब्रह्मविद्यायांयोगशास्त्रेश्रीशिवराघवसंवादे
शरीरनिरूपणंनामनवमोध्यायः॥९॥श्रीगणे
शायनमः॥श्रीरामउवाच॥भगवन्नत्रजीवोसौ
जंतुर्देहेवतिष्ठति॥जायतेवाकुतोजीवःस्वरू

पंचास्य किं वद ॥१॥ देहांते वा कुत्र याति गत्वा वा
कुत्र तिष्ठति ॥ कथमायाति वा देहं पुनर्नायाति वा
वद ॥२॥ श्रीभगवानुवाच ॥ साधु पृष्टं महाभाग गु
ह्याद्गुह्यतमं प्रिय ॥ देवैरपि सुदुर्ज्ञेयमिदं ब्रह्माद्यैश्च
महर्षिभिः ॥३॥ अत्यस्मै नैव वक्तव्यं त्वयापि रघु
रघुनंदन ॥ तद्भक्त्याहं परं प्रीतो वक्ष्याम्यवहितः शृ
णु ॥४॥ सत्यज्ञानात्मकोनंतः सच्चिदानंदविग्रहः

शि०
१०
63

परमात्मा परं ज्योतिरव्यक्तो व्यक्तकारणं ॥५॥ नित्यो
विशुद्धः सर्वात्मा निर्लेपो हं निरंजनः ॥ सर्वधर्मविही
नश्चा नग्राह्यो मनसापि च ॥६॥ नाहं सर्वेंद्रियैर्ग्रा
ह्यः सर्वेषां ग्राहको ह्यहं ॥ ज्ञाताहं सर्वलोकस्य म
मज्ञाता न विद्यते ॥७॥ दूरः सर्वविकाराणां परिणा
मादिकस्य च ॥ यतो वाचो निवर्त्तंते अप्राप्य मन
सा सह ॥८॥ आनंदं ब्रह्म मां ज्ञात्वा न बिभेति कु ६१

तश्चन॥ यस्त्वा सर्वाणि भूतानि मय्येवेदं स पश्यति॥
॥९॥ मां च सर्वेषु भूतेषु ततो नैव न विद्यते॥ यस्मिन्स
र्वाणि भूतानि ह्यात्मैवाभूद्विजानतः॥१०॥ को मोहः त
त्र कः शोक एकत्वमनुपश्यतः॥ येषु सर्वेषु भूतेषु गू
ढात्मा न प्रकाशते॥११॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्म
या सूक्ष्मदर्शिभिः॥ अनाद्यविद्यया युक्तस्तथाप्ये
कोहमव्ययः॥१२॥ अव्याहतो ब्रह्मरूपो जगत्त्वात्मा

65

हमीश्वरः॥ज्ञानमात्रे यथा दृश्यमिदं स्वप्ने जगत्त्रयं
॥१३॥तद्वन्मयि जगत्सर्वं दृश्यतेस्ति विलीयते॥ना
नाविद्यासमायुक्तो जीवत्वेन वसाम्यहं॥१४॥पंचक
र्मेंद्रियाण्येव पंचज्ञानेंद्रियाणि च॥मनोबुद्धिरहंका
रः चित्तं चेति चतुष्टयं॥१५॥वायवः पंच मिलिता यां
ति लिंगशरीरतां॥तत्राविद्यासमायुक्तं चैतन्यं प्रति
बिंबितं॥१६॥व्यावहारिकजीवस्तु क्षेत्रज्ञः पुरुषोपि

च॥ स एव जगतां भोक्ता नान्यो यो पुण्यपापयोः॥ १७॥
इहामुत्र गतिं तत्र जायते स्वप्रमादिच ता॥ यथादर्पणका स्य
लिम्नाम लिनं दृश्यते मुखं॥ १८॥ तद्वदंतः करणी दो
षेरात्मापि दृश्यते॥ १९॥ परस्पराध्यासवशात्स्यादं पतः
तःकरणात्मनोः॥ ऐकोभा वाभिमानेन परात्मा
दुःखभागिव॥ मरुभूमौ जलं त्वेनमध्या न्हार्कमरी
चिका॥ २०॥ दृश्यते मन्दचित्तस्य न त्वादृक्‌ः सदारविः॥
स्पः

शि०

१० तद्धदात्मा च निर्लेपो दृश्यते मूढचेतसां॥२१॥ स्वावि
द्यामात्रदोषेण कर्तृत्वादिकधर्मवान्॥ तत्र चान्नमये
पिंडे हृदि जीवो वतिष्ठति॥२२॥ प्राणरवायं व्याप्य देहे
लं भ्रुवे वहितः शृणु॥ सोयं तदभिधानेन मांसपिंडो
विराजते॥२३॥ नाभेरूर्ध्वमधः कंठाद्व्याप्य तिष्ठति य
सदा॥ तस्य मध्येस्ति हृदयं सनालं पद्मकोशवत्॥२४
अधोमुखं च तत्रास्ति सूक्ष्मसुषिरमुत्तमं॥ दहरा

काशमित्युक्तं तत्र जीवोवतिष्ठति ॥२५॥ बालाग्रश
तभागस्य शतधा कल्पितस्य च ॥ भागो जीवः स वि
ज्ञेयः स चानंत्याय कल्पते ॥२६॥ कदंबकुसुमोद्भूत
केसरा इव सर्वतः ॥ प्रसृता हृदयान्नाड्यो याभिर्व्याप्तं
शरीरकं ॥२७॥ हितं बलं प्रयच्छंति यस्मात्तेन हिताः
स्मृताः ॥ द्विसप्ततिसहस्रैस्ताः संख्याता योगवि
त्तमैः ॥२८॥ हृदयात्तास्ततो निष्क्रांता यथार्काद्रश्म

यो यथा ॥ एकोत्तरशतं तासु मुख्या विष्वग्विनिर्गताः ।
॥२९॥ वहंत्यंभो यथा नद्यो नाड्यः कर्मफलं तथा ॥
18 अनंतेकोर्ध्वगा नाडी मूर्ध्नी पर्यंतमंजसा ॥३०॥ प्र
तींद्रियं दशदश निर्गता विषयोन्मुखाः ॥ नाड्यः
शर्मादिहेतुत्वात्तस्मादिफलभुक्तये ॥३१॥ सुषु
प्तौ मतिसामादिसात्तया गच्छंति मुख्यासु ॥ तत्रोपचि
तो चैतन्यं जीवात्मानं विदुर्बुधाः ॥३२॥ यथासर्वे हु

रदृश्योपिदृश्यतेचंद्रमंडले॥तद्वत्सर्वगतो

त्मा॥लिंगदेहेपिदृश्यते॥३३॥दृश्यमानेय

थाकुंभेघटाकाशोपिदृश्यते॥निश्चलःपरिपू

र्णोपिगच्छतीत्युपचर्यते॥३४॥जाग्रत्कालेयथा

ज्ञेयमभिव्यक्तिर्विशेषधीः॥व्यक्तोतिनिष्क्रियःस

र्वाभानुर्दशदिशोयथा॥नाडीभिर्वृत्तयोयांतिलिं

गदेहसमुद्भवाः॥तत्तत्कर्मानुसारेणजाग्रद्भो

गोपलब्धये ॥३६॥ इदं लिंगशरीराख्यामामोक्षा
च्च विनश्यति ॥ आत्मज्ञानेन नष्टेऽस्मिन्स्याद्विद्युकशा
रीरके ॥३७॥ आत्मस्वरूपावस्थानं मुक्तिरित्यभि
धीयते ॥ उत्पादिते घटे यद्वद्घटाकाशत्वमृच्छति
॥३८॥ घटे नष्टे यथाकाशः स्वरूपेणावतिष्ठति ॥ जाग्र
त्कर्मक्षयवशात्स्वप्नभोगउपस्थिते ॥३९॥ बोधाव
स्थां तिरोधायदेहाद्याश्रयलक्षणं ॥ कर्मोद्भावि

त संस्कारास्तत्र स्वपरिरंसया॥४७॥ आवस्थांच
प्रयात्यन्यां मायावी चात्ममायया॥ घटादि विषया
सर्वान्बुध्यादिकरणानि च॥४८॥ भूतानि कर्मवशतो
वासनामात्रसंस्थितान्॥ एतान्पश्यन्स्वयंज्योतिः
साक्षात्माव्यवतिष्ठति॥४९॥ अंतःकरणादी
नां वासनाद्वासनात्मना॥ वासनामात्रसाक्षित्वं ते
न तत्र परात्मनः॥५०॥ वासनाभिः प्रपंचोत्र दृश्य

तेकर्मचोदितः॥जाग्रद्धर्मोयथातद्वत्कर्त्तृकर्मक्रि
यात्मकः॥निःशेषबुद्धिसाक्ष्यात्मास्वयमेवप्रकाश
68 ते॥वासनामात्रसाक्षित्वंसाक्षिणःस्वापउच्यते॥४५
भूतजन्मानियद्वत्तत्कर्मतद्वासनावशात्॥निद्री
यस्त्वाद्धयस्यांहिस्वप्नंप्रायःप्रपश्यति॥४६॥मध्ये
वयसिकार्त्स्न्यस्यात्कारणानामिहार्दितः॥प्रायेण
वीक्ष्यतेस्वप्नंवासनाकर्मणोर्वशात्॥४७॥यिया

स्तुः परलोकं वंस्तुकर्म विद्यादि संभृतं॥ भा विनोज
न्मनोरूपं स्वप्नमात्मा प्रपश्यति॥४८॥ यहत्स्वपत
नाद्भिन्नः श्रांतो गगनमंडले॥ आकुंच्य पक्षौ पतति
नीडे नीलयनायसः॥४९॥ एवं जाग्रत्स्वप्नभूमौ श्रां
तस्त्वात्माभिसंचरन्॥ आपीतकरणग्रामः कारणे
नैति चैकतां॥५०॥ नाडीमार्गैरिंद्रियाणामाकृष्या
दाय वासनाः॥ सर्वं ग्रसित्वा कार्यं च विज्ञानात्मा प्र

श्रि॰

१० लीयते॥५१॥ईश्वराख्यो व्यावर्तेत यदा सुखमयो भ

वेत्॥ कृत्स्नं प्रपंच विलयस्तदा भवति चात्मनः॥५२

69 योषितः काम्यमानायाः संभोगांते यथा सुखं॥ सआ

तै नंदमयो बाह्ये नांतरः केवलस्तथा॥५३॥ प्रज्ञात्मतां ६१

ना समासाद्य विज्ञात्मा तथैव सः॥ विज्ञानात्माकार

णात्मा तथा लिंगस्थायी परः॥५४॥ अविद्यासू

क्ष्मवृत्त्यानुभवत्येव सुखं यथा॥ अज्ञानमपि साक्ष्या

ददाति भिक्षानुभयते ॥५५॥ तथाहं सुखमस्वा
प्सं नैव किंचिदवेदिषं ॥ इत्येवं प्रत्यभिज्ञापि पश्चा
त्तस्योपपद्यते ॥५६॥ जाग्रत्स्वप्नसुषुप्त्याख्यमिति हा
सुत्रचलोवयोः ॥ पश्चात्कर्मवशादेव विस्फुलिं
गाइवानलात्तु ॥५७॥ जायंते कारणादेव मनोबुद्ध्या
दिकानि तु ॥ पयः पूर्णो घटो यद्वन्निमग्नः सलि
लाशये ॥५८॥ तीरे वीह्न लग्ना याति विज्ञानतामा

तथैत्यजः॥ विज्ञानात्मा कारण(मा)त्लद्यालिषंस्तथापि
70 सः॥५९॥ दृश्यतेगच्छतीत्येवंनेष्यायात्मदृश्यतां॥
एकाकारोयमा।तत्र कार्येष्वेवंपरःपुमान्॥६०॥
कूटस्थोदृश्यतेतद्वद्गच्छत्यागच्छतीतिसः॥ मोह
मात्रांतरायत्वात्सर्वंतस्योपपद्यते॥६१॥ देहाद्यती
तश्चात्माऽपिस्वयंज्योतिःस्वभावतः॥ एवंजीवस्व
रूपंतेप्रोक्तंदशरथात्मज॥६२॥ आनंदःपरमा

नंदः सर्वानंदः परिस्थितः ॥ ६१ ॥ इति श्रीपद्म
पुराणे शिवगीतासूपनिषत्सु ब्रह्मविद्यायां योग
शास्त्रे शिवराघवसंवादे जीवस्वरूपणं नाम दश
मोऽध्यायः ॥ १० ॥ श्रीभगवानुवाच ॥ देहांतरगतिं
तस्य परलोकगतिं तथा ॥ वक्ष्यामि नृपशार्दूल म
त्तः शृणु समाहितः ॥ १ ॥ भुक्तं पीतं यतस्तत्र तद्रसा
दामबंधनं ॥ स्थूलदेहस्य लिंगस्य तेन जीवनधा

श्रि०

११ रणम् ॥३॥ व्याधिनाजरया वा पिपीलयत्तेजाठ

७ रोनलः ॥ श्लो भषां तेन भुक्तं वा पीतं वा न पचत्यलं

॥३॥ भुक्तपीतरसाभावात्तदाशु व्यंति धातवः ॥

भुक्तं पीतं रसेनैव देहे लिंपति नित्यशः ॥४॥ स ६०

मं करोतियत्तस्मात्समानो वायुरुच्यते ॥ इदानीं

तद्रसाभावाद्दामर्वधनहानितः ॥५॥ परिपक्वा

रसत्वेन यथा गौरवतः फलं ॥ स्वयमेव पतत्याशु

तद्यास्मिंगतनोर्ङ्गेतू ॥६॥ त्वत्तत्स्थानादपाकृष्य
हृषीकाणां च वासनाः ॥ आध्यात्मिकानि भूतानि
हृत्पद्मे चैकतां गतः ॥७॥ ततोर्ध्वगः प्राणवायुः सं
युक्तो नववायुभिः ॥ ऊर्ध्वोच्छ्वासी भवत्येष यदा तेनै
कतां गतः ॥८॥ वक्षसो वाथ मूर्ध्नो वा नाडीमार्गसमाश्रि
तः ॥ विद्याकर्मसमायुक्तो वासनाभिश्च संयुतः ॥९॥
प्रज्ञात्मानं समाश्रित्य विज्ञानात्मायसंपत्तिः ॥ यथा

प्रसर्पति

कुंभो नीयमानो देशाद्देशांतरं प्रति ॥१०॥ रवं पूर्व इव
सर्वत्र सन्नाकाशो पि तत्र तु ॥ घटाकाशाख्यतां याति
तद्वल्लिंगपरात्मनः ॥११॥ पुनर्देहांतरं याति तथा क
र्मानुसारतः ॥ आमोक्षात् संचरत्येव मत्स्यः कूलद्व
यं यथा ॥१२॥ पापभोगाय चेद्गच्छेद्यमदूतैरधिष्ठि
तः ॥ यातनादेहमाश्रित्य नरकानेव पश्यति ॥१३॥
इष्टापूर्तादिकर्माणि योनुतिष्ठति सर्वदा ॥ पितृलोकं

४ति

व्रजत्येष क्रममाश्रित्य बर्हिषः ॥१४॥ धूमं रात्रिं
ततः कृष्णं [illegible] पक्षं तस्माच्च दक्षिणं ॥ अयनं च तत
तो लोकं पितॄणां च ततः परं ॥१५॥ चंद्रलोके दिव्यदे
हं प्राप्य भुंक्ते परां श्रियं ॥ तत्र चंद्रसमानो सौ यावत्क
र्मफलं वसेत् ॥१६॥ तथैव कर्मशेषेण यदि दं पुनरा
व्रजेत् ॥ वपुर्विहाय जीवत्वमासाद्याकाशमेति सः
॥१७॥ आकाशाद्वायुमागत्य वायोरंभो व्रजत्यथ ॥

११ श्रद्धो मेघं समासाद्य घनतो वृष्टिर्भवेदसौ ॥१८॥ ततो
धान्यानि सर्वाणि जायन्ते कर्मचोदितः ॥ योनिमध्ये
प्रपद्यन्ते शरीरत्वाय देहिनः ॥१९॥ भुक्तिमन्ये तु संया
न्ति यथाकर्म यथाश्रुतं ॥ ततो भुक्त्वं समासाद्य पितृ ७१
भ्यो भुज्यते परं ॥२०॥ ततः शुक्रं रजश्चैव भूत्वा गर्भो
पि जायते ॥ ततः कर्मानुसारेण भवत्स्त्री पुंनपुंसकः
॥२१॥ एवं जीवगतिः प्रोक्ता मुक्तिं तस्य वदामि ते

दारत्ताश्चांत्यादिपुत्तांस्त्यक्त्वा विचारतो भवेत् ॥२२॥ स
यातिदेवयानेन ब्रह्मलोकावधिं नरः ॥ अर्चिर्भूत्वा गतिं
प्राप्य शुक्लपक्षमथो व्रजेत् ॥२३॥ उत्तरायणमासाद्य
संवत्सरमथो व्रजेत् ॥ आदित्यचंद्रलोकौ तु विद्युल्लो
कं मतः परं ॥२४॥ अथ दिव्यः पुमान्कश्चित द्ब्रह्मलोका
दिहेति सः ॥ दिव्ये वपुषि संधाय जीवं मेनं नयत्यसौ ॥
॥२५॥ ब्रह्मलोके दिव्यदेहे भुक्त्वा भोगान्यथेप्सिता

74

न्॥ तत्रोषित्वा चिरं कालं ब्रह्मणा सह मुच्यते॥२६॥ स्तु
द्द्ब्रह्मरतोयश्च सनायात्येव कुत्रचित्॥ तस्य प्राणा वि
लीयंते जले सैंधवपिंडवत्॥२७॥ स्वप्नस्य हि यथा दृ
ष्टा प्रबुद्धस्य विलीयते॥ ब्रह्मज्ञानवतस्तद्वद्धि लीयं
ते तत्र वै तते॥२८॥ विद्याकर्म विहीनो यस्तृतीयं स्थान
मेति सः॥ भुक्त्वा न नरकान् घोरान् महारौरवरौरवान्॥२९ रौ
पश्चात्पापविशेषेण क्षुद्रजंतुर्भवेदसौ॥ यः कामं

कदंशादिजन्मासोलभतेभुवि॥३०॥ एवंजीवगतिः
प्रोक्ताकिमन्यच्छ्रोतुमिच्छसि॥ श्रीरामउवाच॥ भग
वन्यत्वयाप्रोक्तं फलंतुज्ञानकर्मणोः॥३१॥ ब्रह्मलो
केचंद्रलोकेभुंक्तेभोगानितिप्रभो॥ गंधर्वादिषु
लोकेषु कथंभोगः समीरितः॥३२॥ देवत्वंप्राप्नु
यात्कश्चित्कश्चिदिंद्रत्वमेतिच॥ एतत्कर्मफलंचा
स्तु विद्याफलमथापिवा॥३३॥ तद्ब्रूहि गिरिजाकां

शि०

११ तत्रमे संशयो महान्॥ श्रीभगवानुवाच॥ तद्विद्याक

र्मणोरेवानुसारेण फलं लभेत्॥ ३४॥ युवाच सुंदरः

श्रोत्रीनीरोगो बलवान्भवेत्॥ सप्तद्वीपां वसुमतीं भुंक्ते

निष्कंटकां यदि॥ ३५॥ स प्रोक्तो मानुषानंदस्तस्मा ७२

च्छतगुणो मतः॥ मानुषस्तपसा यस्तु गंधर्वो जायते

स्य तु॥ ३६॥ तस्माच्छतगुणो देवो गंधर्वः स न संशयः

एवं शतगुणानंद उत्तरोत्तरतो भवेत्॥ ३७॥ पितॄणां

चिरलोकानामज्ञात्सुखसंपदां॥ देवतानामथो ब्रह्मगु
णास्तद्व्रजायते॥ ३८॥ ब्रह्मणश्चैव मानंदः पुरस्ता
दुत्तरोत्तरं॥ ज्ञानाधिक्यात्सुखाधिक्यं नान्यदस्ति सुरा
लये॥ ३९॥ श्रोत्रियो वृजिनो कामहतो यश्च द्विजो भवेत्
तस्याप्येवं समाख्याता आनंदाश्चोत्तरोत्तरं॥ ४०॥ आ
त्मज्ञानात्परं नास्ति तस्माद्दशरथात्मज॥ ब्रह्मणः
कर्मभिर्नैव भिन्नैर्न वर्धते नैव हीयते॥ ४१॥ नलेप्य

76

पातकैर्नैवकर्मणाज्ञानवान्यदि॥तस्मात्सर्वाधिकोवि
प्रोज्ञानवान्नैवजायते॥४२॥ज्ञात्वायःकुरुतेकर्मत
स्याक्षयफलंलभेत्॥यत्फलंलभतेमर्त्यःकोटिब्रा
ह्मणभोजनैः॥४३॥तत्फलंसमवाप्नोतिज्ञानिनं
यस्तुभोजयेत्॥ज्ञानवंतंद्विजंयस्तुद्विषतेचनराध
मः॥४४॥सऊष्यमाणोम्रियतेयस्मादीश्वरएवसः॥
उपासकोनयात्येवयस्मात्पुनरधोगतिं॥४५॥उपा

स्मनरतोभूत्वा तस्मादाः स्वसुखी नृप ॥ ४६ ॥ इति
श्रीपद्मपुराणे शिवगीतासूपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे शिवराघवसंवादे उपासनामहात्म्यनामै
कादशोऽध्यायः ॥ ११ ॥ श्रीरामउवाच ॥ भगवन्देवदेवे
शानमरतेस्त्वं महेश्वरः ॥ उपासनाविधिं ब्रूहि देशं का
त्रै लं च तं ... तः ॥ १ ॥ अंगानि नियमांश्चैव मपि तेनुग्रहोयदि
श्रीशिवउवाच ॥ शृणु राजन्प्रवक्ष्यामि देशं कालमुपा

सनं ॥२॥ सर्वाकारोऽहमेवैकः सच्चिदानंदविग्रहः ॥
मद्देशेनपरिछिन्नादेहाः सर्वदिवौकसां ॥३॥ येप्य
न्यदेवताभक्तायजंते श्रद्धयान्विताः ॥ तेपिमामेवरा
जेंद्रयजंत्यविधिपूर्वकं ॥४॥ यस्मात्सर्वमिदंविश्वंम ७५
त्तोनव्यतिरिच्यते ॥ सर्वक्रियाणांभोक्ताहंसर्वस्याहं
फलप्रदः ॥५॥ येनाकारेणयेमर्त्यामामेवैकमुपास
ते ॥ तेनाकारेणतेभ्योहंप्रसन्नोवांछितंददे ॥६॥ वि

धिना विधिना वापि भक्त्या येमामुपासते ॥ तेभ्यः
छा फलं प्रयछामि प्रसन्नोहं न संशयः ॥७॥ अपिचेत्सुदु
राचारो भजते मामनन्यभाक् ॥ साधुरेव स मंतव्यः
सम्यक्व्यवसितो हि सः ॥८॥ स्वजीवत्वेन यो वेत्ति मा
मेवैकमनन्यधीः ॥ तं न स्पृशंति पापानि ब्रह्महत्या
दिकान्यपि ॥९॥ उपासा विधयस्त्वत्र चत्वारः समुदा
हृताः ॥ संपद्वारोपसर्वांगाध्यासा इति मनीषिभिः

॥१०॥ आत्मनस्य चाधिकत्वेन गुणयोर्हि चिंतितं ॥ अ
78 नंतं वै मन इति सा संपत्तिरुदाहृता ॥११॥ विधिमा
रोप्य योपास्या ह्यारोपः परिकीर्तितः ॥ यद्वदोंकार उ
द्गीथमुपासीतेत्युदाहृतः ॥१२॥ आरोपो बुद्धिपू
र्वेण यउपास्या विधिश्च सः ॥ योषितमग्निमतिर्यद्व
द्ध्यासः समुदाहृतः ॥१३॥ क्रियायोगेन चोपास्या
विधिः संवर्ग उच्यते ॥ संवर्त्तवायुः प्रलये भूतान्ये
षोपितानि पति

कोवसीदत्ति॥१४॥उपसंगम्यबुध्यायदासनंदेव
तात्मना॥तदुपासनमंतस्याच्चबहिःसंपदादयः
॥१५॥ज्ञानांतरानंतरितःसजातिर्ज्ञानसंह
तेशःसंपत्तुदेवतात्मत्वमुपासनमुदीरितं॥१६॥सं
पदादिषुबाह्येषुदृढबुद्धिरुपासनं॥उपासनमिति
प्रोक्तंतदंगानिशृणुवंश्शृणु॥१७॥तीर्थक्षेत्रादिगमनं
श्रद्धांतत्रपरित्यजेत्॥स्वचित्तैकाग्रतायत्रतत्रासी

१२ तत्सुखंहि द्विजः॥१९॥केवलेमृदुतल्पेवाव्याघ्रचर्मणि
79 वास्थितः॥विविक्तदेशनियतःसमग्रीवशिरस्तनुः ग्री
अत्याश्रमस्थःसकलानींद्रियाणिनिरुध्यच॥भ
क्त्याथस्वगुरुंनत्वायोगंविद्वान्प्रयोजयेत्॥२०॥ ७१
यस्त्वविज्ञानवान्भवत्ययुक्तेनमनसासदा॥तस्येंद्रि
याण्यवश्यान्यसदश्वाइवसारथेः॥२१॥विज्ञानिन
स्तुभवतियत्नेनमनसासह॥तस्येंद्रियाणिवश्या

नि सदश्वा इव सारथेः ॥२२॥ यस्त्वविज्ञानवान्भवत्य
मनस्कः सदाशुचिः ॥ न च तत्पदमाप्नोति संसारमधिग
च्छति ॥२३॥ विज्ञानीयस्तु भवति समनस्कः सदाशुचिः
स तत्पदमवाप्नोति यस्माद्भूयो न जायते ॥२४॥ वि
ज्ञानसारथिर्यस्तु मनःप्रग्रहं एव च ॥ सोऽध्वनः पार
माप्नोति मध्येवं परमं पदं ॥२५॥ हृत्पुंडरीकं विरजं वि
शुद्धं विषदं तथा ॥ वश्यं कं च विचिंत्यात्र ध्यायेन्मोप

शि०

१२ रमेश्वरं ॥२६॥ अचिंत्यरूपमव्यक्तमनंतममृतं शिवं

४० आदिमध्यांतरहितं प्रशांतं ब्रह्मकारणं ॥२७॥ एवं वि

भुं चिदानंदमरूपमजमद्भुतं ॥ शुद्धस्फाटिकसंकाश

मुमादेहार्धधारिणं ॥२८॥ व्याघ्रचर्मांबरधरं नीलकं १९

ठं त्रिलोचनं ॥ जटाधरं चंद्रमौलिं नागयज्ञोपवीतिनं

॥२९॥ व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदं ॥ पराभ्यां

मूर्ध्वहस्ताभ्यां बिभ्राणं परशुं मृगं ॥३०॥ कोटिमध्या

ल्लसूर्याभं चंद्रकोटिसुशीतलं । चंद्रसूर्याग्निनयनं स्म
रेद्धृत्कमलोरुहे ॥३१॥ भूतिभूषितसर्वांगं सर्वाभरणभू
षितं ॥ एवमात्मारणिं कृत्वा प्रणवं चोत्तरारणिं ॥३२॥ ज्ञा
ननिर्मथनाभ्यासात्साक्षात्पश्यति मां जनः ॥ वेदवा
क्यैरलभ्योहं न शास्त्रैर्नापि चेतसा ॥३३॥ ध्यानेन वृ
णुते यो मां सर्वदाहं वृणोमि तं ॥ नाविरतो दुश्चरि
तान्नाशांतो नासमाहितः ॥३४॥ नाशांतमानसो वा

पि न ज्ञानेन लभेत मां ॥ जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचो यः
प्रकाशते ॥ ३५ ॥ तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्र
८१ मुच्यते ॥ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ॥
॥ ३६ ॥ तेभ्यो विलक्षणः साक्षी चिन्मात्रोहं सदाशिवः
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतांतरात्मा
सर्वाध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो नि
र्गुणश्च ॥ ३७ ॥ एको वशी सर्वभूतांतरात्मा एकं बीजं

बहुधा यः करोति ॥ तं मां नित्यं येनुपश्यंति धीरास्तेषां
शांतिः शाश्वती नेतरेषां ॥ ३९ ॥ अग्निर्यथैको भुवनप्र
विष्टो रूपं रूपं प्रतिरूपं बभूव ॥ एकस्तथा सर्वभूतांत
रात्मा न लिप्यते लोकदुःखेन बाह्यः ॥ ४० ॥ वेदेहयो
मं पुरुषं महांतमादित्यवर्णं तमसः परस्तात् ॥ सएव
विद्वानमृतोत्र भूयो नान्यस्तु पंथा अयनाय विद्यते ॥
॥ ४१ ॥ हिरण्यगर्भं विदधाति पूर्वं वेदांश्च तस्मै प्रहि

शि०

१२ णो मियोहं ॥ तं देवमीड्यं पुरुषं पुराणं निश्चित्य मां मृत्यु

मुखात्प्रमुच्यते ॥ ४२ ॥ एवं शान्त्यायुक्तः सन् वेत्ति मां त

त्त्वतस्तु यः ॥ निर्मुक्त दुःखसन्तानः सोंते मय्येव लीय

ते ॥ ४३ ॥ सोहमर्कमहं ज्योतिरर्कज्योतिरहं शिवः ८०

आत्मा ज्योतिरहं शुक्रः शुक्रज्योतिरसोप्यहं ॥ ४४ ॥

इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु ब्रह्मविद्या

यां योगशास्त्रे शिवराघवसंवादे उपासनाविधिर्नाम

द्वादशोध्यायः ॥१२॥ ॥ ॥ श्रीगणेशाय नमः ॥
सूत उवाच ॥ एवं श्रुत्वा कौसल्येयस्तुष्टात्मा मतिमतां वरः ॥
पप्रच्छ गिरिजाकांतं सुभगं मुक्तिलक्षणं ॥१॥ श्रीराम उवा
णा च ॥ भगवन्करुँ विष्टहृदं त्वं प्रसीद मे ॥ स्वरूपं लक्षणं मुक्तेः प्र
ब्रूहि परमेश्वर ॥२॥ श्रीभगवानुवाच ॥ सालोक्यं चापि सा
रूप्यं सार्ष्ट्यं सायुज्यमेव च ॥ कैवल्यं चेति तां विद्धि मुक्तिं
राघव पंचधा ॥३॥ मां पश्यति निष्कामः सर्वदाज्ञानवर्जि
प

तः॥ मयास्तमानरूपः स स्वमेत्लोके महीयते॥ ५॥ इष्टा
पूर्त्तादिकर्माणि मत्प्रीत्यै कुरुते तु यः॥ यत्करोति यदश्ना
४३ ति यज्जुहोति ददाति यत्॥ ६॥ यत्तपश्यति तत्सर्वं यः करो
ति मदर्पणं॥ मल्लोके स श्रियं भुंक्ते मत्तुल्यंप्रभवं भजन्॥ ७॥
यस्तु शांत्यादियुक्तः सन्मामात्मत्वेन पश्यति॥ स जायते
परं ज्योतिरद्वैतं ब्रह्मकेवलं॥ ८॥ आत्मस्वरूपावस्थानं मु
क्तिरित्यभिधीयते॥ सत्यं ज्ञानमनंतं सदानंदं ब्रह्मकेव

त्वं ॥९॥ सर्वधर्मविहीनं च तस्माद्वाचामगोचरं ॥ सजाती
यविजातीयपदार्थानामसंभवात् ॥१०॥ अतस्तद्व्यतिरि
क्तानामद्वैतमिति संज्ञितं ॥ मत्स्वरूपमिदं राम शुद्धं
यदभिधीयते ॥११॥ मय्येव दृश्यते सर्वं जगत्स्थावरजं
गमं ॥ व्योम्नि गंधर्वनगरं यथादृष्टं न दृश्यते ॥१२॥ अना
द्यविद्यया विशेषः ॥ सर्वं मय्येव कल्पितं ॥ निवर्तते तु
मय्येव मय्येवेदं विलीयते ॥१३॥ मम स्वरूपज्ञानेन

शि०

१३ यथाविद्याप्रणश्यति॥ तथैकरावर्वर्तेहंमनोवाचामगो

नं चरं॥१४॥ सदावपरमानंदःस्वप्रकाशःचिदात्मकः॥

८५ नकालःपंचभूतानिदिशोनविदिशश्चतां॥१५॥म

दन्यन्नास्तियत्किंचितदावर्त्तेहमेकलः॥नसंदृशे ६२

तिष्ठतिमेस्वरूपंनचक्षुषापश्यतिमांतुकश्चित्॥हृ

ध्यं दामनीषामनसाभिगुप्तं येमांविदुस्तेह्यमृताभ

वंति॥१७॥श्रीरामउवाच कथंभगवतोज्ञानं

त्वंमर्त्यस्यजायते॥तत्रोपायंपरंब्रूहिमयितेनुग्रहोयदि॥
॥१८॥श्रीभगवानुवाच॥विरज्यसर्वभूतेभ्यआविरिंचि
पदावधि॥घृणांवित्तस्यसर्वस्मिन्पुत्रमित्रादिकेष्वपि
॥१९॥श्रद्धालुर्मुक्तिमार्गेषुवेदांतज्ञानलिप्सया॥उपा
सनकरोभूत्वागुरुंब्रह्मविदंव्रजेत्॥२०॥सेवाभिःप
रितोष्यैनंचिरकालंसमंततः॥सर्ववेदांतवाक्यानां
मयितात्पर्यनिश्चयं॥२१॥श्रवणंनाममतत्प्राहुः॥स

वैतेब्रह्मवादिनः॥ सोहमस्म्यादिदृष्टांतयुक्तिभिर्यैर्हि
चिंतनं॥२२॥ तदेव मननं प्राहुर्वाक्यार्थस्योपबृंहणं॥
८५ निर्ममो निरहंकारः सर्वसंगविवर्जितः॥२३॥ सदाशां
त्यादियुक्तः सन्नात्मन्यात्मानमीक्ष्यते॥ यत्सदाध्या
नयोगेन तन्निदिध्यासनं स्मृतं॥२४॥ सर्वकर्मक्षय
वशात्साक्षात्कारोपि वात्मनः॥ कस्यचिज्जायते शी
घ्रं चिरकालस्य कस्यचित्॥२५॥ कूटस्थानीह कर्मा

णिकोटिजन्मार्जितान्यपि ॥२६॥ ज्ञानेनैव विनश्यंति न
तु कर्मायुतैरपि ॥ ॥ ज्ञानाद्दूर्ध्वं तु यत्किंचित्पुण्यं वा
हु पापमेव वा ॥ क्रियते व^ वाल्पं वा न तैस्तार्यैर्विलिप्य
य ते ॥२७॥ शरीरारंभकं यत्तु प्रारब्धं कर्म तन्मतं ॥ तद्भो
गेनैव नष्टं स्यान्न तु ज्ञानेन नश्यति ॥२८॥ निर्ममो निरहं
कारो निर्लेपः संगवर्जितः ॥ सर्वभूतेषु चात्मानं सर्व
भूतानि चात्मनि ॥२९॥ यः पश्यन्संचरत्येष जीवन्मु

शि॰

१३ त्मोभिधीयते ॥ अहिर्निर्ल्वयिनीयद्वद्द्रष्टुं सर्पभयप्र
दा ॥३०॥ ततोस्य न भयं किंचित्तद्वद्धुरयं जनः ॥ यदा
४६ सर्वे प्रमुच्यंते कामा येषां वशं गताः ॥३१॥ अथ म
र्त्योमृतो भवत्येतावदनुशासनं ॥ मोक्षस्य न हि
वासोस्ति न ग्रामांतर एव वा ॥३२॥ अज्ञानहृदय ६४
ग्रंथिनाशो मोक्ष इति स्मृतः ॥ रसायच्युतपादोयः
सतदैवपतत्यधः ॥३३॥ तद्वज्ञानवतो मुक्तिर्जाय

ते निश्चिता पितु॥ तीर्थे चंडालगेहे वा यदि वा नष्ट
चेतसः॥३४॥ परित्यजन्देहमेवं ज्ञानादेव विमुच्य
ते॥ संवीतो येन केनाश्नभक्ष्यं वा भक्ष्यमेव वा॥३५
शायनं यत्र कुत्रापि सर्वात्मा मुच्यते त्र सः॥ क्षीरादु
सिद् द्धृतमाज्यं यक्षिप्तं पयोतत्पुनः॥३६॥ न तेन चैकतां
याति संसारे ज्ञानवांस्तथा॥ नित्यं पठति यो ध्याय मि
मं रामश्चणोति वा नरः॥३७॥ समुच्यते देहबंधादना

या। सेनराघव। ततोसंशयाच्चित्तस्त्वंनित्यंपठमही

87 पते।।अनयासेनतेनैवसर्वदामोक्षमाप्स्यसि।।३९

इतिश्रीपद्मपुराणेशिवगीतासूपनिषत्सुब्रह्मवि

द्यायांयोगशास्त्रेशिवराघवसंवादेसांख्ययोगो

नामत्रयोदशोध्यायः।।१३।।श्री।। ।। ।। ।।

श्रीरामउवाच।।भगवन्यदितेरूपंसच्चिदानंदविग्र

हं।।निष्कलंनिष्क्रियंशांतंनिरवद्यंनिरंजनं।।१।।

सर्वधर्मविहीनं च मनोवाचामगोचरं ॥ सर्वव्यापि
नमात्मानमीक्षते सर्वतः स्थितं ॥ आत्मविद्यातपो
मूलं तद्ब्रह्मोपनिषत्परं ॥ अमृतं सर्वभूतात्मा कार्य
कारणकारणं ॥३॥ एतद्दृश्यमग्राह्यं तज्ज्ञाह्यं वाव
छं भवेत् ॥ अज्ञोपायमजानामि केन मिश्रो स्मि शंक
र ॥४॥ श्रीशिव उवाच ॥ शृणु राम प्रवक्ष्यामि तत्रो
पायं महाभुजः ॥ सगुणोपासनाभिस्तु चित्तैका

श्री०
२४ गुणं विधायच ॥५॥ स्थूलोसौ रंचकान्यायात्तत्र चित्तं
४४ प्रवर्तयेत् ॥ तस्मिन्नन्नमये पिंडे स्थूले देहे तनुभृ
तां ॥६॥ जन्मव्याधिजरामृत्युनिलयेवर्ततेदृढं ॥
आत्मबुद्धिरहंमानात्कदाचिन्नैवहीयते ॥७॥ व ६६
पुरूपपद्यतेलोकेवपुरेवप्रलीयते ॥ आत्मानजाय
तेनित्योम्रियतेवाकदाचन ॥८॥ सजायतेस्मिन्
विपरिणमतेवर्धतेपिच ॥ क्षीयतेनश्यतोत्यंते

षड्भावा वपुषः स्मृताः ॥९॥ आत्मनो न विकारित्वं
घटस्य नभसो यथा ॥ एवमात्मा वपुरस्मादिति
संचिंतयेद्बुधः ॥१०॥ मृषानिक्षिप्तदेहे माभः कोशः प्रा
णमयो तनुः ॥ वर्तते तेन रतो देहे बद्धः प्राणादिवायुभिः ॥
॥११॥ कर्मेन्द्रियैः समायुक्तश्चरन्नादी क्रियात्मकः ॥
क्षुत्पिपासापराभूतो नायमात्मा जडो यथा ॥१२॥
चिद्रूप आत्मा येनैव स्वदेहमनुपश्यति ॥ आत्मैवा

हं परं ब्रह्म निर्लेपं सुखनीरधिः ॥१३॥ न तस्य जाति
६ किंचिन्न तस्यास्ति किंचन ॥ ततः प्राणमये कोशे को
89 शास्त्येव मनोमयः ॥१४॥ स संकल्पविकल्पात्मा बुद्धी
न्द्रियसमायुतः ॥ कामः क्रोधस्तथा लोभो मोहो मा
त्सर्यमेव च ॥१५॥ दंभश्चेत्यरिषड्वर्गो मांछादयति
चेतसा ॥ मनोमयस्य कोशस्य धर्मास्तस्य तस्य तु ॥१६॥ श्चैव २
या कर्मविषया बुद्धिर्वेदशास्त्रार्थनिश्चिता ॥ सा तु
२शस्य

ज्ञानेंद्रियैःसार्धंविज्ञानमयकोशलः॥१७॥इहकर्तृ
त्वाभिमानीसएवतुनसंशयः॥इहामुत्रगतिस्तस्य
सजीवोव्यावहारिकः॥१८॥व्योमादिसात्विकांशे
भ्योजायंतेधींद्रियाणितु॥व्योम्नःश्रोत्रंभुवोघ्राणं
जलाज्जिह्वाचतेजसः॥१९॥चक्षुर्वायोस्त्वगुत्पन्ना
तेषांभौतिकतात्मनः॥व्योमादीनांसमस्तानांसा
त्विकांशेभ्यएवतु॥२०॥जायतेबुद्धिमनसीबुद्धिः

श्री०

१४ चेन्निश्चयात्मिका ॥ वाक्पाणिपादपायूपस्थौ निकर्मेन्द्रि

90 याणि तु ॥२१॥ व्योमादीनां रजोंशेभ्यो व्यस्तेभ्यस्तान्य

नुक्रमात् ॥ समस्तेभ्यो रजोंशेभ्यः पंचप्राणादिवा

यवः ॥२२॥ जायंते सप्तदशकमेवं लिंगशरीरकं ॥ ८६

एतल्लिंगशरीरं तु तप्तायःपिंडवच्चलः ॥२३॥ परस्प

राध्यासयोगात्साक्षिचैतन्यसंयुतः ॥ लदानंदम

यः कोशो भोक्ता त्वं प्रतिपद्यते ॥२४॥ विद्याकर्म

पात्रादीनां भुंजतो ह्यामुत्र संस्मृतः ॥ यथा ध्यासंवि
ल्लयेषस्व स्वरूपेण तिष्ठति ॥२५॥ अविद्यामात्रसं
युक्तः साक्ष्यात्मा जायते तथा ॥ दृष्टांतः [illegible] कर्पादीना
मनुभूतेः स्मृतेरपि ॥२६॥ आतोंतःकारणाध्यासानध्या
सत्वेन चात्मनः ॥ भोक्तृत्वं साक्षिता चेति हृध्यंतस्योपप
द्यते ॥२७॥ आतपश्चापि तच्छाया तत्प्रकाशो विराजते
एको भोजयिता तत्र भुंक्तोन्यः कार्मणां फलं ॥२८॥ से

त्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि
प्रग्रहं तु मनस्तथा॥२॥ इंद्रियाणि हयान्याहुर्विषया
९१ स्तेषु गोचराः॥ इंद्रियैर्मनसा युक्तं भोक्तारं विद्धि पूरु
षं॥३॥ एवं शांत्यादियुक्तः सन्नुपास्ते यः सदा द्विजः॥
उपर्युपर्यनेकानि यथैव कदलीतरोः॥४॥ वल्क
लानि ततः पश्चाल्लभंते सारमुत्तमं॥ तथैव पंचभूते
षु मनः संक्रामयेत्क्रमात्॥५॥ तेषां मध्ये ततः सारं

मात्मानुमनुविंदति ॥ एवं मनः समाधाय संयतो मन
सा हि जः ॥ ३३ ॥ अथ प्रवर्त्तये च्चित्तं निराकारे परात्म
नि ॥ ततो मनः प्रगृह्णाति परमात्मानमेकलं ॥ ३४ ॥
श्रीराम उवाच ॥ भगवन् श्रवणे नैव प्रवर्त्तते जनाः क
थं ॥ वेदशास्त्रार्थसंपन्ना यज्वानः सत्यवादिनः ॥ ३५ ॥
श्रुण्वंतोपि तथात्मानं जायते नैव केचन ॥ ज्ञात्वापि म
न्यते मिथ्या किमुतत्त्वमायया ॥ ३६ ॥ श्रीशिव उवाच ॥

शि०

२५ एवमेवमहाबाहोनात्रकार्याविचारणा॥ दैवीह्येषागुण
मयीमममायादुरत्यया॥३७॥ मामेवयेप्रपद्यंतेमा
१२ यामेतांतरंतिते॥ अभक्तायेमहाबाहोममश्रद्धावि
वर्जिताः॥३८॥ फलंकामयमानास्तेचैहिकामुष्मिका १०
दिदं॥ ह्यल्पयेचाल्पंचातिशयंयतःकर्मफलंमतं॥३९॥
तद्विज्ञायकर्माणियेकुर्वंतिनराधमाः॥ मातुःप
तंतितेगर्भेमृत्यौवैजंपुनःपुनः॥४०॥ नानायोनि

षुजालस्य देहिनो यस्य कस्यचित्॥ कोटिजन्मार्जितैः पु
ण्यैर्मयि भक्तिः प्रजायते॥ ४१॥ स एव लभते ज्ञानं मद्भ
क्तः श्रद्धयान्वितः॥ नान्यकर्माणि कुर्वाणं जन्मकोटि
शतैरपि॥ ४२॥ ततः सर्वं परित्यज्य मामेकं शरणं व्र
ज॥ ४३॥ अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्॥ ४४॥ य
त्तपस्यसि कौन्ते त्वं तत्कुरुष्व मदर्पणं॥ ततः परतरं ना

स्तिभक्तिर्मयि रघूत्तम ॥४५॥ इति श्रीपद्मपुराणे शिव
गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे शिवराघव
संवादे पंचकोशोपासनं नाम चतुर्दशोऽध्यायः ॥१४॥ श्री॥
93 श्रीराम उवाच ॥ भक्तिस्ते कीदृशी देव जायते वा कथं
चन ॥ यया निर्वाणरूपत्वं लभते मोक्षमुत्तमं ॥१॥ तद्व
द गिरिजाकांत प्रार्थये येन निर्वृतिः ॥ श्रीभगवानुवाच ॥
यो वेदाध्ययनं यज्ञं दानानि विविधानि च ॥२॥ मदर्प

पाधियाश्चतुर्या स मे भक्तः स मे प्रियः ॥ यज्ञभस्म समादा
य विशुद्धं श्रो त्रियान्वयात् ॥ ३ ॥ अग्निरित्यादिभिर्मं
त्रैरभिमंत्र्य यथाविधिः ॥ अविमुक्तो द्वारकायां श्रीशै
ले पुंडरीकके ॥ ४ ॥ धृतपापो महारंभः स मे भक्तः स
मे प्रियः ॥ उद्धूलयति गात्राणि तेनार्चयति मामपि
॥ ५ ॥ तस्मात्परतरो भक्तो मम रामन विद्यते ॥ सर्वदा
शिरसा कंठे रुद्राक्षान्धारयेत्तु यः ॥ ६ ॥ पंचाक्षरीज

शि०

प परः स मे भक्तः स मे प्रियः ॥ भस्मच्छन्नो भस्मशा
१५ यी सर्वदा विजितेंद्रियः ॥७॥ यस्तु रुद्रं जपेन्नित्यं चिं
९५ तयन्मामनन्यधीः ॥ स तेनैव च देहेन शिवः संजा
यते स्वयं ॥८॥ जपेद्यो रुद्रसूक्तानि तथाथर्वशिरः १२
परं ॥ कैवल्योपनिषत्सूक्तं श्वेताश्वतरमेव च ॥९॥
ततः परतरो भक्तो मम लोके न विद्यते ॥ अन्यत्र
धर्मोपदेशादन्यत्रास्मात्कृताकृतात् ॥१०॥ अ

न्यत्रभूताद्भव्याच्चयत्तद्वक्ष्यामि तच्छृणु। वदंतिय
त्पदं वेदाः शास्त्राणि विविधान्यपि।।११।।सर्वोपनि
५८ षदं सारं दग्धोद्धृतमिवामृतं।।यदिच्छंतो ब्रह्मचर्यं
चरंति मुनयः सदा।।१२।।तत्तेपदं संग्रहेण ब्रवीम्यो
मीतियत्पदं।।एतद्देवाक्षरं ब्रह्मचैतद्देवाक्षरं परं।।१३
एतद्देवाक्षरं ज्ञात्वा योयदिच्छतियस्ययत्।।एतदा
लंबनं श्रेष्ठमेतदालंबनं परं।।१४।।एतदालंबनं

95

ज्ञात्वा ब्रह्मलोके महीयते ।छंदसां यस्तु धेनुनां व

षभत्वेन चोदितः ॥१५॥ इदमेव पवित्रं स्तेतु मस्तस्य च

धारणं ॥ मेधर्यी ह्येि लेको ब्रह्म यत्परमेमि ति ॥१६

एतत्समस्य मात्रास्तु रकारो कारको नयः ॥ मकार

स्यावसाने र्ध मात्रे ति परिकीर्त्तिताः ॥१७॥ पूर्वो गभू

श्च ऋग्वेदो ब्रह्मा ष्टवसवस्तथा ॥ गार्हिपत्य श्च गायत्री गं

गा प्रातः सवनं तथा ॥१८॥ द्वितीया च भुवो विष्णु

रुद्रोनुष्टुप्यजुस्तथा॥ यमुना दक्षिणाग्निश्च माध्यं
दिनसवः स्मृतः॥१९॥ तृतीया च भुवः सोमात्मा दि
त्याश्च महेश्वरः॥ अग्निराहवनीयश्च जगती च स
रस्वती॥२०॥ तृतीयं सवनं प्रोक्तमथर्वत्वेनयन्मतं॥
तृतीयायावसाने धर्ममात्रासा सोमलोकगा॥२१॥
अथर्वांगिरसः संवर्तकोग्निर्मरुतस्तथा॥ विराडूव
हद्वसतोसुच्छाद्विर्यच्छपुच्छकः॥२२॥ प्रथमा रक्ता

श्री०

१५ वर्णास्या द्वितीया भास्वरामता॥ तृतीया विद्युदा

भासा चतुर्थी शुक्लवर्णिनी॥२४॥ सर्वं जातं जायमानं

९६ तदोंकारे प्रतिष्ठितं॥ विश्वं भूतं च भुवनं॥ विचित्रं ब

हुधा तथा॥ जातं च जायमानं यत्तत्सर्वं रुद्र उच्यते॥ त्रे ९४

ताग्नेः स्मार्तवह्नेश्च शिवाग्नेश्चापि सत्तमा हुतं॥२५॥ भस्मा

भिमंत्र्य यो मां तु प्रणवेन प्रपूजयेत्॥ तस्मात्परतरो

भक्तो मम लोके न विद्यते॥२६॥ शालाग्नेर्दाववह्नेः

वाभस्मानीयाभिमंत्रितं ॥ योविलिंपतिगात्राणिस
स्त्रह्मादिविमुच्यते ॥२७॥ कुशपुष्पैर्बिल्वदलैः पुष्पै
र्गिरिसंभवैः ॥ योमामर्चयते नित्यं प्रणवेन प्रि
योहि सः ॥२८॥ पुष्पं फलं समृद्धं वा पत्रं सलिलमे
व वा ॥ योदद्यात्प्रणवैर्मह्यं तत्कोटिगुणितं भवेत् ॥२९
अहिंसा सत्यमस्तेयं शौचमिंद्रियनिग्रहः ॥ वेदस्याद
ध्ययनं नित्यं स मे भक्तः स मे प्रियः ॥३०॥ प्रदोषे यो म

मस्थानं गत्वा इज्यते पुमान्॥ स परां श्रियमाप्नोति
यि पश्चात्तस्मिन्विलीयते॥३१॥ अष्टम्यां वा चतुर्दश्यां पर्व
णोरुभयोरपि॥ भक्तिभावितसर्वांगो यः पूजयति
९७ मां निशि॥३२॥ सोमवारे विशेषेण स मे भक्तो न न
श्यति॥ पंचामृतैः स्नापयेद्यः पंचगव्येन वा पुनः॥३३
पुष्पोदकैः कुशजलैः स्नानैः स्नान्यैः प्रियो मम॥ पय
सा सर्पिषा वापि मधुनेक्षुरसेन वा॥३४॥ पंचामृ

पाल्लजेनापिनाकिके ल्लजल्लेन वा ॥ गंधोदकेन वा मां

यो रुद्रमंत्रमनुस्मरन् ॥३५॥ अभ्यषिंचेत्सतो नान्यः

कश्चित्प्रियतरो मम ॥ आदित्याभिमुखो भूत्वा ऊ

र्ध्वबाहुर्जले स्थितः ॥३६॥ मां ध्यायन् रविबिंबस्थ

मथर्वशिरसं जपेत् ॥ प्रविशेत्स शरीरे सोऽहं सह

पलियेर्या ॥३७॥ बृहद्रथंतरं साम दिव्य देवव्रतानि

च ॥ तद्योगयागवेदांश्च यो गायति ममाग्रतः ॥३८

शि॰

१५ इहश्रियंपरांभुक्त्वान्तेसायुज्यमाप्नुयात्॥ईशान
स्यादिमंत्रोन्योजपेन्नित्यंममाग्रतः॥३९॥मत्सायुज्य
98 मवाप्नोतिममलोकेमहीयते॥भक्तियोगोमया
प्रोक्तःएवंरघुकुलोद्भव॥४०॥सर्वकामप्रदोमंत्रः ९६
गातू किमन्यच्छ्रोतुमिच्छसि॥४१॥इतिश्रीपद्मपुराणेशि
वगीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेशिव
राघवसंवादेभक्तियोगोनामपंचदशोध्यायः॥१५

श्रीगणेशायनमः ॥ श्रीरामउवाच ॥ भगवन्मोक्षमार्गो
यत्त्वयामे समुदाहृतः ॥ तत्राधिकारिणं ब्रूहि तत्रमेसं
शयोमहान् ॥१॥ श्रीभगवानुवाच ॥ ब्रह्मक्षत्रविशः
शूद्राः स्त्रियश्चात्राधिकारिणः ॥१॥ ब्रह्मचारीगृह
स्थोवानुपनीतोथवाद्विजः ॥२॥ वनस्थोवावर्णस्थोवा न
युतिः पाशुपतव्रती ॥ बहुनात्रकिमुक्तेन यस्यभक्तिः
शिवार्चने ॥३॥ सएवात्राधिकारीस्यान्नान्यः कश्चित्क

थंचन॥ जडोंधोवधिरोमूको निःशौचःकर्मवर्जितः॥४॥ऽ
११ अप्लोपहतभक्ताश्चभूतिरुद्राक्षधारिणः॥५॥ लिंगिनोऽ अ२
यश्चवाह्येहितेनात्रैवाधिका रिणः॥६॥ योमांगुरुंपाऽस्य
१८ पतंम्रतंहैनराधिपः॥ विष्णुंवानसमुच्येतजन्मकोटि
शतैरपि॥८॥ अनेककर्मसक्तोपिशिवज्ञानविवऽ
र्जितः॥ शिवभक्तिविहीनश्चसंसारेनैवमुच्यते॥
॥९॥ आसक्तःफलरागेणयेतुवैदिककर्मणा॥व

ष्टमात्रफलं लोकानां भक्त्या विधिकारिणः ॥८॥
अविमुक्ते द्वारिकायां श्रीशैले पुंडरीकके ॥ देहां
ते तारकं ब्रह्म विंदते मध्यमुमहालये ॥९॥ यस्य हस्तौ
च पादौ च मनश्चैव सुसंयुतम् ॥ विद्या तपश्च की
र्तिश्च स तीर्थफलमश्नुते ॥१०॥ विप्रस्यानुपनी
तस्य विधिरेष समुदाहृतः ॥ नाभिव्याहारयेद्ब्रह्मप
दादि नियमादृते ॥११॥ स शूद्रेण समस्तावद्यावद्

श्रि॰
१६

देहावज्ञायते ज्ञानमसंवित्तिर्नैव ध्याने सर्व एवाधिका
रिणः ॥१२॥ संसारान्मुच्यते जन्तुः शिवतादात्म्यभाव
100 नात् ॥ यस्माद्दानं तपो वेदाध्ययनं चान्यकर्म वा ॥१३॥
सहस्रांशं तु नार्हन्ति सर्वदा ध्यानकर्मणः ॥ जाति १६
माश्रममङ्गानि देशं कालं तथापि वा ॥१४॥ आस
नादीनि कर्माणि ध्यानं नापेक्षते क्वचित् ॥ गच्छंस्ति
ष्ठन्स्वपन्वापि शयानो वान्यकर्मणि ॥१५॥ पातके

नापिशुनोवाधपानोदेवाद्विमुच्यते ।। स्वल्पमप्यस्यध
र्मस्यत्रायतेमहतोभयात् ।। आश्चर्येवाभयेशोकेक्षु
तेवाममनामयः ।। १७ ।। व्याजेनवास्मरेद्यस्तुसयातिप
रमांगतिं ।। महापापैरपिस्पृष्टोदेहान्तेयस्तुमांस्मरे
त् ।। १८ ।। पंचाक्षरींचोच्चरतिसमुक्तोनात्रसंशयः ।। वि
श्वंशिवमयंयस्तुपश्यत्यात्मानमात्मना ।। १९ ।। तस्यक्षेत्रेषु
तीर्थेषुकिंकार्यंवान्यकर्मसु ।। सर्वेणसर्वदाकार्यंभूति

रुद्राक्षधारणं ॥२०॥ युक्तो न चाप्ययुक्तो न शिवभक्तिमभी
प्सिता ॥ यज्ञभस्मसमायुक्तो रुद्राक्षान्यस्तु धारयेत् ॥
॥२१॥ महापापैरपि स्पृष्टो मुच्यते नात्र संशयः ॥ अन्यानि
शैवकर्माणि करोति न करोति वा ॥२२॥ शिवं जपेद्यस्तु
सर्व सर्वदोषैर्मुच्यते तु सः ॥ अंतकाले तु रुद्राक्षान् विभूतिं धार
येत्तु यः ॥२३॥ महापापोपपापौघैरपि स्पृष्टो नराधमः ॥
सर्वथा नोपसर्पन्ति तं जनं यमकिंकराः ॥२४॥ बिल्वम्

लमहादायसा॥ शरीरमुपलिंपेलिंगं॥ अंतकालेऽन्तकजेनेस्तं
हरीभ्रियतेनरः॥२५॥ श्रीरामउवाच॥ भगवन्नूजितः
वुत्रकुत्रवात्वंप्रसीदसि॥ तद्ब्रूहिममजिज्ञासावर्त्तते
महतीविभो॥२६॥ श्रीभगवानुवाच॥ मदावागोमयेना
पिभस्मनाचंदनेनवा॥ सिकताभिर्दारुणावापाषाणेऽ
नाथनिर्मिता॥२७॥ लोहेनाथवारंगेनकांस्यकर्पूरपि
त्तलैः॥ ताम्ररौप्यसुवर्णैर्वारत्नैर्नानाविधैरपि॥२८

शि॰

३६ अथवा पारदेनैव कार्पूरेणाथवा कृता ॥ प्रतिमा शिवलिंगं
वा द्रव्यैरेतैः कृतं तु यत् ॥ २९ ॥ रामेमां पूजयेत्तत्र फलं कोटि
६२ गुणोत्तरं ॥ मृद्दारुकांस्यलोहैश्च पाषाणेनापि निर्मिता ॥ ३०
गृहिणा प्रतिमा कार्या शिवं शश्वदभीप्सता ॥ आयुः श्रियं
कुलं धर्मं पुत्रान्प्यश्नुते तैः क्रमात् ॥ ३१ ॥ बिल्ववृक्षे तत्फले १००
वा यो मां पूजयते नरः ॥ परां श्रियमवाप्नोति मम लोके म
हीयते ॥ ३२ ॥ बिल्ववृक्षं समाश्रित्य यो मंत्रं विधिना जपे

त्।। एवं न दिवसेनैव तत्पुरश्चरणं भवेत्।।३३।। यस्तु ब
ल्ववने नित्यं कुटीं कृत्वा विशेन्नरः।। सर्वे मंत्राः प्रसिध्यंति
जपमात्रेण केवलं।।३४।। पर्वताग्रे नदीतीरे बिल्वमूले शि
वालये।। अग्निहोत्रे केशवस्य सन्निधौ तु जपेत्तु यः।।३५
नैवास्य विघ्नं कुर्वंति दानवा यक्षराक्षसाः।। तं न स्पृशंति
पापानि शिवसायुज्यमृच्छति।।३६।। स्थंडिले वा जले वन्हौ वा
यूवाकाश एव च।। गिरौ स्वात्मनि वा ये मां पूजयेत्प्रयतो नरः

103

॥३७॥ सहस्त्रं फलमाप्नोति लवमात्रेण राघव॥ आत्मपूजा
समानास्ति पूजा रघुकुलोद्भव॥ ॥३८॥ मत्सायुज्यमवाप्नो
ति चंडालोप्यात्मपूजकः॥ सर्वान्कामानवाप्नोति मनुष्यः
वंशबलासने॥३९॥ कृष्णाजिने भवेन्मुक्तिर्मोक्षश्री व्याघ्रऽ
चर्मणि॥ कुशासने भवेज्ज्ञानमारोग्यं पत्रनिर्मिते॥४०॥ प्रा
ङ्मुखोदङ्मुखो वापि जपं पूजां समाचरेत्॥ पाषाणे दुःखऽ
माप्नोति काष्ठे नानाविधान्दान्॥४१॥ वस्त्रे श्रियमवाऽ

न्योतिभूमौमंत्रोनसिद्ध्यति।। अक्षमालाविधिंवक्ष्येश्र
णुष्वावहितोनृप।। साम्राज्यंस्फाटिकोदद्यात्पुत्रजीवःपरां
श्रियं।। आत्मज्ञानंकुशग्रंथीरुद्राक्षःसर्वकामदः।।४३।।
त्ता प्रवालैश्चकृतामालासर्वलोकवशप्रदा।। मोक्षप्रदाचमा
लास्यादामलकफलैःकृता।।४४।। मुक्ताफलैःकृतामा
लासर्वविद्याप्रदायिनी।। माणिक्यरचितामालात्रैलोक्य
स्यवशंकारी।।४५।। नीलैर्मरकतैर्वापिकृताशत्रुभयप्रदा।।

शि०

१६ सुवर्णरचितामालादद्याद्वै महतीं श्रियं ॥ ४६ ॥ तथारोप्य
मयीमाला कन्यांयच्छति कामिनां ॥ त्वक्ताचासर्वकामानां
104 दायिनी पारदैस्तृता ॥ ४७ ॥ अष्टोत्तरशतंमाला तत्रस्या
दुत्तमोत्तमा ॥ शतसंख्योत्तमामाला पंचाशन्मध्यमामता
॥ ४८ ॥ चतुःपंचशतायद्वा अधमासप्तविंशतिः ॥ अथ १०२
मापंचविंशत्यायदिवाशतनिर्मिता ॥ ४९ ॥ पंचाशदक्ष
रााण्यमालानुलोमप्रतिलोमतः ॥ उत्थेवंस्थापयेन्मंत्रीनक

- स्मे चित्तं दर्शयेत् ॥५०॥ वर्णैर्विन्यस्तया यस्तु क्रियतेऽ
मालया जपः ॥ एकवारेण तस्यैव पुरश्चर्या कृता भवेत् ॥
॥५१॥ सव्यपार्ष्णिं गुदस्थाप्य दक्षिणां च ध्वजोपरि ॥
योनिमुद्रासने स्थित्वा प्रजपेद्यः समाहितः ॥५२॥ यं कंचि
दपि वा मंत्रं तस्य स्युः सर्वसिद्धयः ॥ छिन्ना रुद्धास्तंभिता
श्च मिलिता मूर्छितास्तथा ॥५३॥ सुप्ता मंत्रा हीनवी
र्या दग्धाः त्रस्ताः रिपक्षकाः ॥ बाला यौवनमत्ताश्च वृद्धा

105

मंत्राश्च येमताः॥५४॥ यो निमुद्रासने स्थित्वा मंत्रानेवं
विधाजपेत्॥ आस्तंमुहूर्तमारभ्य मध्याह्नं प्रजपेन्मनुं॥
॥५५॥ अतऊर्ध्वं कृते जाप्ये विनाशो भवति ध्रुवं॥ पुरश्च
र्याविधानेन सर्वकामफलेष्वपि॥५६॥ निसेनैमित्तिके
दैव वापितपश्चर्यासुवापुनः॥ सर्वजपः कार्यो न दोषस्तत्र क
श्चन॥५७॥ यस्तु रुद्रं जपेन्नित्यं ध्यायमानो ममाकृतिं॥
षडक्षरं वा प्रणवं निष्कामो विजितेंद्रियः॥५८॥ अथवा

थर्वशिरोमंत्रं कैवल्यं वा रुद्धूलतमं ॥ स तेनैव च देहेन शि
वः संजायते स्वयं ॥ ५९ ॥ अधीते शिवगीतां यो नित्यमेतां
जितेंद्रियः ॥ श्रृणुह्वा स मुक्तः स्यात्संसारान्नात्र संशयः
॥ ६० ॥ सूत उवाच ॥ एवमुक्त्वा महादेवस्तत्रैवांतरधीय
त ॥ रामः कृतार्थमात्मानममन्यत तदैव सः ॥ ६१ ॥ एवं
मया समासेन शिवगीता समीरिता ॥ एतां यः प्रजपेन्नि
त्यं श्रृणुयाद्वा समाहितः ॥ ६२ ॥ एकाग्रचित्तो यो मर्त्यस्त

शि०
१६

स्यमुक्तिः करे स्थिता॥ अतः शृणुध्वं मुनयो नित्यमेतां
समाहिताः॥ ६३॥ अनायासेन वो मुक्तिर्भविता नात्र संश
यः॥ कायक्लेशो मनःक्षोभो धनहानिर्न चात्मनः॥ ६४॥ यीडा
स्ति श्रवणादेव यस्मात्तैवल्यमाप्नुयात्॥ शिवगीतामतो
नित्यं शृणुध्वमृषिसत्तमाः॥ ६५॥ अथ प्रभृतिनः सूत
त्वमाचार्यः पिता गुरुः॥ अविद्यायाः परं पारं यस्मात्तार
यितासनः॥ ६६॥ उत्थाय ते ब्रह्मसूतं गरीयान् ब्रह्मदः

१०६

१०४

११५०

पिता॥तस्मात्सूतात्मजस्त्वत्तः सत्योनान्योस्तिनोगुरुः॥
॥६७॥इत्युक्ताप्रययुः सर्वेसायंसंध्यामुपासितुं॥सूतुवंतः
स्सूतपुत्रंतेसंतुष्टागोमतीतटं॥६८॥इतिश्रीपद्मपुराणेशि
वगीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेशिवराघव
संवादेमोक्षयोगोनामषोडशोध्यायः॥१६॥ ॥ ॥